श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ शान्तिपञ्चकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ शान्तिपञ्चकम् ॥

शन्नो॑ मि॒त्रश्शं वरु॑णः।

शन्नो॑ भवत्वर्य॒मा।

शन्न॒ इन्द्रो॒ बृह॒स्पतिः॑।

शन्नो॒ विष्णु॑रुरुक्र॒मः।

नमो॒ ब्रह्म॑णे।

नम॑स्ते वायो।

त्वमे॒व प्र॒त्यक्षं॒ ब्रह्मा॑सि।

त्वामे॒व प्र॒त्यक्षं॒ ब्रह्म॑ वदिष्यामि।

ऋ॒तं व॑दिष्यामि।

स॒त्यं व॑दिष्यामि।

तन्माम॑वतु।

तद्व॒क्तार॑मवतु।

अव॑तु॒ माम्।

अव॑तु व॒क्तार᳚म्।

ओं शान्ति॒श्शान्ति॒श्शान्तिः॑ ॥ 1 ॥

शन्नो॑ मि॒त्रश्शंवरु॑णः।
शन्नो॑ भवत्वर्य॒मा।
शन्न॒ इन्द्रो॒ बृह॒स्पतिः॑।
शन्नो॒ विष्णु॑रुरुक्र॒मः।
नमो॒ ब्रह्म॑णे।
नम॑स्ते वायो।
त्वमे॒व प्र॒त्यक्षं॒ ब्रह्मा॑सि।
त्वामे॒व प्र॒त्यक्षं॒ ब्रह्मावा॑दिषम्।
ऋ॒तम॑वादिषम्।
स॒त्यम॑वादिषम्।
तन्मामा॑वीत्।
तद्व॒क्तार॑मावीत्।
आवी॒न्माम्।
आवी᳚द्व॒क्तार᳚म्।
ओं शान्ति॒श्शान्ति॒श्शान्तिः॑ ॥ **2** ॥

स॒ह ना॑ववतु।
स॒ह नौ॑ भुनक्तु।
स॒ह वी॒र्यं॑ करवावहै।
ते॒ज॒स्विना॒वधी॑तमस्तु मा वि॑द्विषा॒वहै᳚।
ओं शान्ति॒श्शान्ति॒श्शान्तिः॑ ॥ **3** ॥

नमो॑ वा॒चे या चो॑दि॒ता या चानु॑दिता॒
तस्यै॑ वा॒चे नमो॒ नमो॑ वा॒चे नमो॑
वा॒चस्पत॑ये॒ नम॒ ऋषि॑भ्यो
मन्त्र॒कृद्भ्यो॒ मन्त्र॑पतिभ्यो॒
मामामृष॑यो मन्त्र॒कृतो॑ मन्त्र॒पत॑यः॒
परा॑दु॒र्माऽहमृषी᳚न्मन्त्र॒कृतो॑
मन्त्र॒पती॒न्परा॑दां वैश्वदे॒वीं
वाच॑मुद्यासग्ं शि॒वामद॑स्तां॒ जुष्टा᳚न्
दे॒वेभ्य॒श्शर्म॑ मे॒ द्यौश्शर्म॑पृथि॒वी
शर्म॒ विश्व॑मि॒दं जग॑त्।
शर्म॑ च॒न्द्रश्च॒ सूर्य॑श्च॒ शर्म॑ ब्रह्म प्रजाप॒ती।
भू॒तं व॑दिष्ये॒ भुव॑नं वदिष्ये॒
तेजो॑ वदिष्ये॒ यशो॑ वदिष्ये॒
तपो॑ वदिष्ये॒ ब्रह्म॑ वदिष्ये
स॒त्यं व॑दिष्ये॒ तस्मा॑
अ॒हमि॒दमु॑प॒स्तर॑ण॒मुप॑स्तृण
उप॒स्तर॑णं मे प्र॒जायै॑ पशू॒नां
भू॑यादुप॒स्तर॑णम॒हं प्र॒जायै॑ पशू॒नां
भू॑यास॒ं प्राणा॑पानौ मृत्योर्मा॑पात॒ं
प्राणा॑पानौ॒ मा मा॑ हासिष्ट॒ं
मधु॑ मनिष्ये॒ मधु॑ जनिष्ये॒

मधुं वक्ष्यामि मधुं वदिष्यामि
मधुंमतीं देवेभ्यो वाचंमुद्यासगं
शुश्रूषेण्याँ मनुष्यैँभ्यस्तं मां
देवा अंवन्तु शोभायै पितरोऽनुंमदन्तु।
ओं शान्तिश्शान्तिश्शान्तिः॥ **4** ॥

शं नो वातः पवतां मातरिश्वा
शं नंस्तपतु सूर्यः।
अहांनि शं भंवन्तु नश्शगं
रात्रिः प्रतिं धीयताम्।
शमुषा नो व्युंच्छतु
शमांदित्य उदेंतु नः।
शिवा नश्शन्तंमा भव
सुमृडीका सरंस्वति।
मा ते व्योंम संदृशिं।
इडांयै वास्त्वंसि वास्तुमद्वाँस्तुमन्तों
भूयास्म मावास्तोँश्छिथ्स्मह्यवास्तुस्स
भूंयाद्योँऽस्मान्द्वेष्टि यं चं वयं द्विष्मः।
प्रतिष्ठाऽसिं प्रतिष्ठावंन्तो भूयास्म मा
प्रंतिष्ठायाँश्छिथ्स्मह्यप्रतिष्ठस्स
भूंयाद्योँऽस्मान्द्वेष्टि यं चं वयं द्विष्मः।

आ वा॑त वाहि भेष॒जं वि वा॑तवाहि॒ यद्रपः॑।
त्वग्ं हि वि॒श्वभे॑षजो दे॒वाना॑ँ दू॒त ईय॑से।
द्वावि॒मौ वातौ॑ वात॒ आसिन्धो॒रापरा॒॑वतः॑।
दक्षं॑ मे अ॒न्य आ॒वातु॒ परा॒ऽन्यो वा॑तु॒ यद्रपः॑।
यद॒दो वा॑त ते गृ॒हे॑ऽमृत॑स्य नि॒धिर् हि॒तः।
ततो॑ नो देहि जी॒वसे॒ ततो॑ नो धेहि भेष॒जम्।
ततो॑ नो॒ मह॒ आव॑ह॒ वात॒ आवा॑तु भेष॒जम्।
श॒म्भूर्म॑यो॒भूर्नो॑ हृ॒दे प्रण॒ आयूग्ं॑षि तारिषत्।
इन्द्र॑स्य गृ॒हो॑ऽसि॒ तं त्वा॒ प्रप॑द्ये॒ सगु॒स्साश्वः॑।
स॒ह यन्मे॒ अस्ति॒ तेन॑।
भूः प्रप॑द्ये॒ भुव॒ः प्रप॑द्ये॒ सुव॒ः प्रप॑द्ये॒
 भूर्भुव॒स्सुव॒ः प्रप॑द्ये वा॒युं
 प्रप॒द्येऽना॑र्तां दे॒वता॒ं
 प्रप॒द्येऽश्मा॑नमाख॒णं
 प्रप॑द्ये प्र॒जाप॑तेर्ब्रह्मको॒शं
 ब्रह्म॒प्रप॑द्य॒ ओं प्रप॑द्ये।
अ॒न्तरि॑क्षं म उ॒र्व॑न्तरं॑ बृ॒हद॒ग्नय॒ः
 पर्व॑ताश्च॒ यया॒ वात॑ः स्व॒स्त्या
 स्व॑स्ति॒मान्तया॑ँ स्व॒स्त्या
 स्व॑स्ति॒मान॑सानि।
प्राणा॑पानौ मृ॒त्योर्मा॑ पात॒ं

प्राणापानौ मा मा हासिष्टं
मयि मेधां मयि प्रजां
मय्यग्निस्तेजो दधातु
मयि मेधां मयि प्रजां
मयीन्द्र इन्द्रियं दधातु
मयि मेधां मयि प्रजां
मयि सूर्यो भ्राजो दधातु।
द्युभिरक्तुभिः परिपातमस्मानरिष्टेभिरश्विना
सौभगेभिः।
तन्नो मित्रो वरुणो मामहन्तामदितिः
सिन्धुः पृथिवी उत द्यौः।
कया नश्चित्र आ भुवदूती सदावृधस्सखा।
कया शचिष्ठयाऽऽवृता।
कस्त्वा सत्यो मदानां
मगंहिष्ठो मथ्सदन्धसः।
दृढा चिदारुजे वसु।
अभीषुणस्सखीनामविता जरितॄणाम्।
शतं भवास्यूतिभिः।
वयस्सुपर्णा उपसेदुरिन्द्रं
प्रियमेधा ऋषयो नाधमानाः।
अपध्वान्तमूर्णुहि पूर्धि

चक्षु॑र्मु॒मुग्ध्यं॑स्मान्नि॒धये॑ऽवब॒द्धान्।
शं नो॑ दे॒वीर॒भिष्ट॑य॒ आपो॑ भवन्तु पी॒तये॑।
शं योर॒भिस्र॑वन्तु नः।
ईशा॑ना॒ वार्या॑णा॒ं क्षय॑न्तीश्चर॒षणी॒नाम्।
अ॒पो या॑चामि भेष॒जम्।
सु॒मि॒त्रा न॒ आप॒ ओष॑धयः सन्तु दु॒र्मि॒त्रास्तस्मै॑
भूयासु॒र्यो॑ऽस्मान्द्वेष्टि॒ यं च॑ व॒यं द्वि॒ष्मः।
आपो॒ हिष्ठा म॑यो॒भु॒वस्ता न॑ ऊ॒र्जे द॑धातन।
म॒हेरणा॑य॒ चक्ष॑से।
यो व॑ः शि॒वत॑मो॒ रस॒स्तस्य॑ भजयते॒ ह न॑ः।
उ॒श॒तीरि॑व मा॒तर॑ः।
तस्मा॒ अर॑ङ्गमाम वो॒ यस्य॒ क्षया॑य॒ जिन्व॑थ।
आपो॑ ज॒नय॑था च नः।
पृ॒थि॒वी शा॒न्ता साऽग्निना॑ शा॒न्ता
सा मे॑ शा॒न्ता शु॒चग्ं॑ शमयतु।
अ॒न्तरि॑क्षग्ं शा॒न्तं तद्वा॒युना॑ शा॒न्तं
तन्मे॑ शा॒न्तग्ं शु॒चग्ं॑ शमयतु।
द्यौश्शा॒न्ता साऽऽदि॒त्येन॑ शा॒न्ता
सा मे॑ शा॒न्ता शु॒चग्ं॑ शमयतु।
पृ॒थि॒वी शान्ति॑र॒न्तरि॑क्ष॒ग्ं॒
शान्ति॒र्द्यौश्शान्ति॒र्दिश॒श्शान्ति॑

रवान्तरदि॒शाश्शान्ति॑
र॒ग्निश्शान्ति॑र्वा॒युश्शान्ति॑
रादि॒त्यश्शान्ति॑श्च॒न्द्रमा॒
श्शान्ति॒र्नक्ष॑त्राणि॒ शान्ति॒
राप॒श्शान्ति॒रोष॑धय॒श्शान्ति॒र्वन॒स्पत॑य॒
श्शान्ति॒र्गौश्शान्ति॑र॒जा शान्ति॒रश्व॒श्शान्ति॒ः
पुरु॑ष॒श्शान्ति॒र्ब्रह्म॒श्शान्ति॑र्ब्राह्म॒ण
श्शान्ति॒श्शान्ति॑रे॒व
शान्ति॒श्शान्ति॑र्मे अस्तु॒ शान्ति॑ः।
तया॒हग्ं॒ शा॒न्त्या स॑र्वशा॒न्त्या
मह्यं॑ द्वि॒पदे॒ चतु॑ष्पदे च॒
शान्ति॑ं करोमि॒ शान्ति॑र्मे अस्तु॒ शान्ति॑ः।
एह॒ श्रीश्च॒ ह्रीश्च॒ धृति॑श्च॒ तपो॑ मे॒धा
प्र॑ति॒ष्ठा श्र॒द्धा स॒त्यं धर्म॑श्चै॒तानि॒
मोत्ति॑ष्ठन्तमनूत्ति॑ष्ठन्तु॒ मा मा॒ग्॒
श्रीश्च॒ ह्रीश्च॒ धृति॑श्च॒ तपो॑ मे॒धा प्र॑ति॒ष्ठा
श्र॒द्धा स॒त्यं धर्म॑श्चै॒तानि॑ मा॒ मा हा॑सिषुः।
उदायु॑षा स्वा॒युषोदोष॑धीना॒ग्॒ं
रसे॒नोत्प॒र्जन्य॑स्य॒
शुष्मे॒णोद॑स्थाम॒मृता॒ग्॒ं अनु॑।
तच्चक्षु॑र्दे॒वहि॑तं पु॒रस्ता॑च्छु॒क्रमु॒च्चर॑त्।

पश्ये॑म श॒रद॑श्श॒तं जीवे॑म श॒रद॑श्श॒तं
नन्दा॑म श॒रद॑श्श॒तं मोदा॑म श॒रद॑श्श॒तं
भवा॑म श॒रद॑श्श॒तग्ं श्रृ॒णवा॑म श॒रद॑श्श॒तं
प्रब्र॑वाम श॒रद॑श्श॒तमजी॑तास्स्याम
श॒रद॑श्श॒तं ज्योक्च॒ सूर्यं॑ दृ॒शे।
य उद॑गान्मह॒तोऽर्णवा᳚द्वि॒भ्राज॑मानस्सरि॒रस्य॒
मध्या॒थ्समा॑ वृष॒भो लो॑हिता॒क्षस्सूर्यो॑
विप॒श्चिन्मन॑सा पुनातु।
ब्रह्म॑ण॒श्चोत॑न्यसि॒ ब्रह्म॑ण आ॒णीस्थो॒
ब्रह्म॑ण आ॒वप॑नमसि धारि॒तेयं पृ॑थि॒वी
ब्रह्म॑णा म॒ही धा॑रि॒तमे॑नेन म॒हद॒न्तरि॑क्षं॒
दिवं॑ दाधार पृथि॒वीग्ं सदे॑वा॒ यद॒हं वेद॒
तद॒हं धा॑रयाणि॒ मा मद्वेदोऽधि॒ विस्रं॑सत्।
मे॒धा॒म॒नी॒षे माऽऽवि॑शताग्ं स॒मीची॑
भू॒तस्य॒ भव्य॒स्याव॑रुद्ध्यै॒
सर्व॒मायु॑रयाणि॒ सर्व॒मायु॑रयाणि।
आ॒भिर्गी॒र्भिर्यद॑तो॒ न ऊ॒नमाप्या॑यय
हरि॑वो॒ वर्ध॑मानः।
य॒दा स्तो॒तृभ्यो॒ महिं॑ गो॒त्रारु॒जासिं॑
भूयि॒ष्ठभाजो॒ अध॑ ते स्याम।

ब्रह्म॒ प्रावा॑दिष्म॒ तन्नो॒ मा हा॑सीत्।
ओं शान्ति॒श्शान्ति॒श्शान्तिः॑ ॥ **5** ॥

**॥ इति शान्तिपञ्चकं समाप्तम् ॥**